कुरुस्तुतिः

व्याकुर्वनिलसच्छास्त्रं स्वीकुर्वस्यैव सन्मतम् ।
हीकुर्वन्यमताचार्यान् मा कुर्वच्युतविस्मृतिम् ॥ १॥

न त्वंकुरु गुरून्पूजयन् नाहंकुरु कदाचन ।
अलंकुरु च दुर्गोष्ठीं नालंकुरु हरेः कथाम् ॥ २॥

अलंकुरु ततो वाचं न हुंकुरु सभान्तरे ।
अङ्गीकुरु हरिं नित्यं नमस्कुरु च सत्कुरु ॥ ३॥

नाङ्गीकुरु हरेः श्रेष्ठमङ्गीकुरु परान्सुरान् ।
ऊरीकुरु सदा व्याख्यामुररीकुरु सज्जनान् ॥ ४॥

दूरीकुरु च दुःशास्त्रं नारीकुरु हरेः कथाम् ।
आविष्कुरु च सत्तत्वं तिरस्कुरु मतान्तरम् ॥ ५॥

पुरस्कुरु शुभश्रेणीमधःकुरु च दुष्कृतम् ।
अन्तःकुरु हरेश्चिन्तां बहिष्कुरु कलेर्भटान् ॥ ६॥

पराकुरु परार्थाशां निराकुरु निराक्रियाम् ।
स्थिरीकुरु मनः कृष्णे तरीकुरु च तत्पदम् ॥ ७॥

धिक्कुरु श्रुतिनिन्दादीन् न्यक्कुरूदरपूरणम् ।
त्रिःकुरु स्नानसन्ध्यार्च्याः स्वःकुरु स्वकरे स्थितम् ॥ ८॥

उरः कुरु पुरं विष्णोः शिरः कुर्वस्य वन्दने ।

गिरः कुरु स्तुतावेवं धुरः सर्वाः परिष्कुरु ॥ ९ ॥

संस्कुर्वित्थं भवज्जन्म कैङ्कर्यं कुरु मापतेः ।
तं कुरु स्ववरं भक्त्याऽस्तंकुरूग्रं भवार्णवम् ॥ १० ॥

सदोपकुरु साधूनां नैवापकुरु कस्यचित् ।
नाथैर्विकुरु कुत्रापि गुरोः प्रतिकुरु प्रियैः ॥ ११ ॥

स्वीकुरु श्रीमदाचार्यभाष्यामृतरसं सदा ।
फूत्कुर्वपरभाष्यार्थतूलानि च पदे पदे ॥ १२ ॥

श्रुतं मतं हृदि ध्यातं साक्षात्कुरु हरिं प्रभुम् ।
प्रसन्नीकुरु मुक्तीश्च सिद्धाः कुरु चतुर्विधाः ॥ १३ ॥

मुक्तोऽप्यश्वास्यपुर्यस्य परिचर्यां मुदा कुरु ।
बन्दीकुरु हरेर्भक्तिं मन्दीकुरु पुनर्भवम् ॥ १४ ॥

हर्येकनिष्ठतासिध्यै वादिराजो हरेः स्तुतौ ।
लकारस्य विभक्तेश्च धातोरप्येकतां व्यधात् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचिता

(लकारविभक्त्येकता) कुरुस्तुतिः सम्पूर्णा

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु